**अखण्डकारणता** (akhaṇḍakāraṇa-tā) *f.* the state of being indivisible cause (शक्तेः) अखण्डकारणतारूपत्वेऽपि तद्विशिष्टस्यैव फलोपधायकत्वेन तज्जनकापेक्षाया आवश्यकत्वात् LaCandr. 828.22; सा (शक्तिः) चाखण्डकारणतारूपा LaCandr. 317.4; कार्यकारणव्यक्तीनामन्यतमत्वव्यक्त्योरेव अखण्डकारणताघटकत्वसंभवात् GuruCandr. i. 170.13.

**अखण्डकारिन्** (akhaṇḍa-kārin) *adj.* performing (one's duties) without break or without omitting any one of them अखण्डकारी पुरुषो ज्ञानकर्मपरायणः। ··· ब्रह्मण्येकात्मतां याति PauṣkS. 30.18; पञ्चकालविधानज्ञस्तत्कर्मैकरणे रतः। अखण्डकारी भवति ViṣṇuDhaP. i. 61.4.

**अखण्डकाल** (akhaṇḍa-kāla) *m.* impartite time ईश्वरस्य कस्मिन्काले सृजेयमितीच्छा। न खल्वखण्डकालस्तत्र विशेषणम्। प्रलयेऽपि सर्गानुवृत्तिप्रसंगात् S'ivārkaMaDī. ii. 70.35 (*on* ii. 2.11); तिथिश्चाखण्डकालविशेषरूपा VyutpaVā. 151.17; अखण्डकालो नित्यः। कार्यः पुनरनित्यः YatīndraDī. 50.12.

**अखण्डकिञ्चिद्धर्म** (akhaṇḍa-kiñciddharma) *m.* some specific impartite or indivisible feature (काले पूर्वोत्तरादिव्यवहारः) अखण्डकिञ्चिद्धर्मगोचरोऽस्तु SiddhāLeSaṁ. 440.1.

**अखण्डकीर्ति** (akhaṇḍa-kīrti) *f.* eternal fame ततस्तदात्मजः श्रीमान्मन्मसत्यमहीपतिः।···ब्रह्माण्डमण्डनाखण्डकीर्तिधामसुधाकरः EI. iv. 91.94.

**अखण्डकोदण्ड** (akhaṇḍa-kodaṇḍa) *m.* unbroken bow चण्डीशः··· तस्थावखण्डकोदण्डचण्डदोर्दण्डमण्डलः HarVi. 43.191.

**अखण्डकोष** (akhaṇḍa-koṣa) *m.* **1** inexhaustible treasure लक्ष्मीः कथं न निवसेदरविन्दखण्डे। तिष्ठन्ति यस्य परिणामशुचावखण्डकोषस्थितेर्गुणगणाः सकृदेव दण्डे HarVi. 11.57; **2** unbroken (i. e. unblossomed) bud, HarVi. 11.57.

**अखण्डक्रोध** (akhaṇḍa-krodha) *m.* unbroken wrath, continuous anger युद्धबन्धुमसिदण्डमखण्डक्रोधबोधितमदोऽयमुदस्य। अभ्यधावत् Surath. 11.11.

**अखण्डक्षीण** (akhaṇḍa-kṣīṇa) *adj.* completely dilapidated, deserted, lonely द्रवालापानन्दितचेत(? ता)स्तमखण्डक्षीणे शरणे ··· उदन्तजातमापप्रच्छे YaśasCam. i. 406.5 (comm. अखण्डक्षीणे जनद्रव्याधारे एकान्ते)

**अखण्डखण्डन** (akhaṇḍa-khaṇḍana) *n.* refutation of impartite nature अखण्डखण्डनादेवं विशेषोऽखण्डवादिना। खण्डितेनापि मनसा स्वीकार्यः AnuVyā. 45A.8 (*on* 3.2); अखण्डेति। यस्मादेवमखण्डखण्डनादखण्डवादिनापीत्यन्वयः NyāySu.(Ja.) 518B.12 (*on* iii. 2.15)

**अखण्डगति** (akhaṇḍa-gati) *adj.* having uninterrupted movement (देवि) त्वं खण्डितब्रह्मकटाहकोटिः सर्वत्र चाखण्डगतिः किलास्से BṛDharmaP. i. 5.43.

**अखण्डगुडाद्यपूर्ण** (akhaṇḍa-guḍādyapūrṇa) *adj.* fully or completely filled with molasses etc. गोधूमचूर्णजनितं यवचूर्णजं वा आदित्यमण्डलमखण्डगुडाद्यपूर्णम्। कृत्वा द्विजाय विधिवत्प्रतिपादयेद्यो भूमौ भवत्यमितमंडलमंडितोऽसौ BhaviP. 672B.12 (iv. 44.9)

**अखण्डगेय** (akhaṇḍa-geya) *n.* song without break, continuous song वागिन्द्रियं तु नामेरूर्ध्वं सर्वमेव स्यात्···अस्ति चेद्गनुभवो जल्पतां विशेषतस्त्वखण्डगेयं गायताम् NyāyMañ. ii. 54.30.

**अखण्डगोचर** (akhaṇḍa-gocara) *adj.* having the entire (light) as the object तस्मात् प्रकृष्टादिवाक्यं नाखण्डगोचरम् Nyāyāmṛ. 439A.8.

**अखण्डग्रहण** (akhaṇḍa-grahaṇa) *n.* **1** receiving (back) the entire (debt) अखण्डग्रहणं प्रत्याह याज्ञवल्क्यः···दत्त्वर्णं पाटयेल्लेख्यम् VyavaNi. 246.4; **2** mention of the entire (branch of the Veda) न चोपनिषन्मात्राध्ययनं कस्यचित् शास्त्रार्थः, स्वाध्यायोऽध्येतव्य इत्यखण्डग्रहणात् S'atDū. 74.10.

**अखण्डचण्डाश्रि** (akhaṇḍacaṇḍāśri) *adj.* having no blunt (i. e. sharp) and terrible edges अन्योन्यनिर्दयविघट्टनतोऽप्यखण्डचण्डाश्रिभिर्विवृतकोपभैरदाग्रैः। ··· दम्भोलिदन्तवदवृश्यत पुष्पदन्तः S'rīKaC. 18.43 (comm. अखण्डा अकुण्ठाश्चण्डा दुर्दर्शा अश्रयो धारा येषां तैः)

**अखण्डचण्डिमन्** (akhaṇḍa-caṇḍiman) *adj.* having undiminishing (i. e. immense) heat जवादवारोहदखण्डचण्डिमा वसुन्धरासंमुखमंर्षिषां चयः PṛthviVi. 2.1; *m.* unceasing impetuosity, full strength अखण्डचण्डिमोद्दण्डभुजदण्डनिपीडितम्। भगवन्भृगुमार्तण्ड भग्नं भर्गशरासनम् PrasaRā. 4.7.

**अखण्डचन्द्रसिद्धि** (akhaṇḍacandra-siddhi) *f.* determination of the indivisible (i. e. unqualified) moon उपायस्तु वैशिष्ट्यम् अखण्डचन्द्रसिद्धौ। तचाविरोधाचन्द्रेऽनुज्ञायते VedāntKa. 54.25 (*on* i. 1.2)

**अखण्डचन्द्राभिमुख** (akhaṇḍacandrābhimukha) *m.* an epithet of S'iva नमोऽस्तु ते···अखण्डचन्द्राभिमुखः सुमुखो दुर्मुखोऽमुखः BrahmP. 40.74.

**अखण्डचर्वणविश्रान्ति** (akhaṇḍacarvaṇa-viśrānti) *f.* culmination in indivisible (i. e. continuous) ecstasy व्यञ्जस्य प्राधान्यम्। प्राधान्यं च यद्यपि ज्ञप्तौ न चकास्ति 'बुद्धौ तत्त्वावभासिन्यां' इति नयेनाखण्डचर्वणविश्रान्तेः तथापि Loc. 35.11 (*on* 1.13)

**अखण्डचारित्र** (akhaṇḍa-cāritra) *adj.* [*f.* -ā] whose character is intact (i. e. chaste) सुतमियमखण्डचारित्रा राज्यार्हं चिकीर्षतीति नैर्घृण्यात्तमेनं बालमजिघांसत् DaśKuC. 139.11; अनेन तनयाः···। ऊढा अखण्डचारित्राः SkandP. vi. 86.18.

**अखण्डचारित्रमहाव्रत** (akhaṇḍacāritra-mahāvrata) *adj.* who has taken the great vows of unviolated good conduct अखण्डचारित्रमहाव्रतानाम् ···कुतोऽपि नासीत्तपसि प्रसंगः VarāṅgaC. 30.62.

**अखण्डचारिन्** (akhaṇḍa-cārin) *adj.* of perfect (unbroken) conduct [DBHS]

**अखण्डचित्** (akhaṇḍa-cit) *f.* impartite or indivisible (i. e. unqualified) consciousness 'एकपदमुक्त्वा यदेवकारमादत्ते श्रुतिस्तेन सात्यन्तिकाभेदपरा'— स चाखण्डचिदेव GuruCandr. ii. 258.5.

**अखण्डचिद्रूप** (akhaṇḍacid-rūpa) *adj.* of the nature of indivisible (i. e. unqualified, pure) consciousness स्वहृन्मण्डलचक्रे अखण्डचिद्रूपे निजहृदयमण्डलचक्रे···मातृकल्पनां प्रथयेत् Bhāsk. ii. 243.15 (*on* iii. 2.1)

**अखण्डचिन्मात्र** (akhaṇḍacin-mātra) *n.* indivisible (i. e. unqualified, pure) consciousness alone तस्या (श्रुतेः) लक्षणया अखण्डचिन्मात्रपरत्वेन जगत्सत्त्वाविरोधित्वात् Nyāyāmṛ. 165A.8; 588B.4; न चाभेदश्रुतेरखण्डचिन्मात्रपरत्वेन भेदाविरोधित्वम् AdvaiSi. 823.2; अखण्डचिन्मात्रज्ञानस्यैव मोक्षहेतुत्वावधारणात् AdvaiSi. 484.13.

**अखण्डचिन्मात्रविषयकत्व** (akhaṇḍacinmātraviṣayaka-tva) *n.* the state of having the indivisible (i. e. unqualified, pure) consciousness alone as the object चैतन्यमपरोक्षमिति व्यवहारस्याखण्डचिन्मात्रविषयकत्वमेव LaCandr. 770.32.

**अखण्डचेतन** (akhaṇḍa-cetana) *n.* indivisible (i. e. unqualified, pure) consciousness पूर्णमद्वयमखण्डचेतनम्···तत्सदाहमिति मौनमाश्रये SvātmPra. 45; *adj.* possessing complete consciousness पूर्णमद्वयमखण्डचेतनं विश्वभेदकलनादिवार्जितम्···मौनमाश्रय VarāU. 3.8.

**अखण्डचैतन्य** (akhaṇḍa-caitanya) *n.* indivisible (i. e. unqualified, pure) consciousness प्राभवं नामेश्वरत्वं तदाक्रान्तनियम्यजगच्चोपलक्षणविधया यस्यैकस्याखण्डचैतन्यस्य तदेकप्राभवम् LalitāTriBh. 273.6 (*on* 9); 328.17 (*on* 43); ईश्वरगतमपि कारणत्वं तदनुगतमखण्डचैतन्यं शाखा चन्द्रमसमिव तटस्थतयोपलक्षयितुं शक्नोति SiddhāLeSaṁ. 53.2.

**अखण्डचैतन्यप्रकाश** (akhaṇḍacaitanya-prakāśa) *m.* the light of the indivisible (i. e. unqualified, pure) consciousness चरमवृत्तिमुपारुह्य निखिलप्रपञ्चमुन्मूलयन् अखण्डचैतन्यप्रकाशस्तन्निवर्तनेऽपि प्रगल्भते SiddhāLeSaṁ. 430.1.

**अखण्डचैतन्यमात्र** (akhaṇḍacaitanya-mātra) *n.* mere indivisible (i. e. unqualified, pure) consciousness अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते VedāntSā.(Sa.) 32.7.

**अखण्डजगदण्ड** (akhaṇḍajagad-aṇḍa) *n.* the egg in the form of the entire world एको देवो महादेवो विज्ञेयस्तु महेश्वरः। ··· अखण्डजगदण्डानां पिण्डीकरणपण्डितः S'ivaP. vii(1). 3.20 (504B.10)

**अखण्डजगदात्मक** (akhaṇḍajagadātma-ka) *adj.* [*f.* -ikā] of the form of the whole universe तन्मध्ये विन्यसेद्देवीमखण्डजगदात्मिकाम् BrahmāṇḍP. iii. 44.149.

**अखण्डजन्यान्तर** (akhaṇḍajanyāntara) *n.* **i** the midst of continuous battle, the thick of the battle ज्वलत्प्रतापाग्निसमक्षमक्षतं जयश्रियो यो घटयन्करग्रहम्। अखण्डजन्यान्तरबद्धपद्धतिः (comm. प्रचण्डजन्य°) सहेलमैक्षिष्ट कबन्धनर्तनम् S'rīKaC. 3.48; **ii** the midst of all the kinsmen S'rīKaC. 3.48 (comm. पाणिग्रहणं कुर्वन् जन्यानां तत्कालसहचारिणां मध्ये तिष्ठन्नर्तनमीक्षते)

**अखण्डजाति** (akhaṇḍa-jāti) *f.* impartite genus न हि व्युत्पित्सुं प्रति गोसादृश्यस्य सखण्डस्य प्रवृत्तिनिमित्तत्वेनोपदर्शनमुचितं तस्मादखण्डजातिविशेषे तात्पर्यमस्येति लक्षणासंभवात् Upask. 404.12 (*on* ix. 2.5)

**अखण्डज्ञान** (akhaṇḍa-jñāna) *n.* extensive knowledge, complete knowledge अखण्डज्ञानरूपेण ··· अगस्त्येन ··· वसुधायामवतीर्णायाम् (सुवर्णमुखर्यां नद्याम्) प्रथमम्···अगस्त्यतीर्थमित्युक्तं पावनम् SkandP. ii(1). 34.9; स च प(?पा)रिणामिकः सकलावरणरहितत्वेनाखण्डज्ञानव्यक्तिरूपः TātpaVṛ. 245.18 (*on* 2.89); निखिलोपाधिहीनो वै यदा भवति पूरुषः। तदा विजयतेऽखण्डज्ञानरूपी निरञ्जनः S'ivS. 1.71; 5.205; तत्सत्यमिति वाक्यजमखण्डज्ञानम् GuruCandr. i. 483.11.

**अखण्डतण्डुल** (akhaṇḍa-taṇḍula) *m.* unbroken rice-grain अखण्डतण्डुलैर्नानावर्णैः सरस्वतीभवने···मणिकुट्टिमेषु भक्तिविकाराः JayaMa. 34.17 (1.3)